योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०३९

अज्ञातलेखकः

श्रीवसिष्ठ उवाच ।

अथ वीर इवारक्तः कालेनास्तमितो रविः ।

अस्त्रतेजःपरिम्लानप्रतापोऽब्धौ समुज्झितः ।। १

रणरक्तरुचिर्व्योमदर्पणप्रतिबिम्बिता ।

जहौ सूर्यशिरश्छेदे संध्यालेखोदभूत्क्षणम् ।। २

भूपातालनभोदिग्भ्यः प्रलयब्धिजलौघवत् ।

समाजग्मुस्तनत्ताला वेताला वलया इव ।। ३

मृष्टध्वान्तासिवलिते दिननागेन्द्रमस्तके ।

संध्यारागारुणं कीर्णं तारानिकरमौक्तिकम् ।। ४

निःसत्त्वेषु तमोन्धेषु रसनारसशालिषु ।

संकोचमाययुः पद्मामृतानां हृदयेष्विव ।। ५

मीलत्पक्षाः क्षणात्सुप्ताः कृच्छ्रप्रोच्छ्रितकन्धराः ।

कुलायेषु खगा आसञ्छवाङ्गेष्विव हेतयः ।। ६

आसन्नचन्द्रसुभगा लोकाः कुसुमपङ्क्तयः ।

उल्लसद्धृदया जाता वीरपक्षेष्विव श्रियः ।। ७

रक्तवारिमयी सायमङ्गगुप्तशिलीमुखा ।

संकुचद्वक्त्रपद्माभूद्रणभूमिरिवाब्जिनी ।। ८

उपर्यभूद्व्योमसरस्ताराकुमुदमण्डितम् ।

अधस्त्वभूद्वारिसरः स्फुरत्कुमुदतारकम् ।। ९

तमस्यपेतभीतानि भूतानि मिलितान्यलम् ।

पयांसीव विसेतूनि प्रसृतानि दिशं प्रति ।। १०

आसीद्रणाङ्गणं गायद्वेतालकुलसंकुलम् ।

क्वणत्कङ्कालकाङ्कस्थकङ्ककाकोलकेलिमत् ।। ११

अथ काष्ठचिताज्वालसताराम्बरभास्वरम् ।

पचत्पचपचाशब्दिमेदोमांसमयानलम् ।। १२

सर्वाङ्गास्थिस्फुटास्फोटस्फुटच्चितिचयोन्मुखम् ।

वेतालललनारब्धजललीलातिरोहितम् ।। १३

श्वकाकयक्षवेतालतालकोलाहलोल्बणम् ।

गमागमेन भूतानां समुड्डीनवनोपमम् ।। १४

रक्तमांसवसामेदोहरणव्यग्रडाकिनि ।

चर्वितासृग्वसामांसस्रवत्सृक्किपिशाचकम् ।। १५

मध्यमध्यचितालोकप्रकटासृक्शवव्रजम् ।

विरूपिकानीयमानस्वांसन्यस्तमहाशवम् ।। १६

उत्ताण्डवोग्रकुम्भाण्डमण्डलोड्डामरोदरम् ।

छमिच्छमित्प्रलापान्तं मेदोसृग्वाष्पसाम्बुदम् ।। १७

वहद्रक्तनदीरंहोरूढभूचररूपिकम् ।

वेतालकुलकङ्कालकर्षणाकुलकाकलम् ।। १८

मृतेभोदरमञ्जूषासुप्तवेतालबालकम् ।

विविक्तैकरणोद्देशपानक्रीडास्थराक्षसम् ।। १९

मत्तवेतालकलहचितालातरणोज्ज्वलम् ।

वहद्रक्तवसामिश्रगन्धबन्धुरमारुतम् ।। २०

रूपिकापेटिकावान्तारणद्रटरटारवम् ।

अर्धपक्वशवास्वादलुब्धयक्षोल्लसत्कलि ।। २१

तुङ्गवङ्गकलिङ्गाङ्गतङ्गणाङ्गलगत्खगम् ।

तारापातोपमहसत्संमुखज्वालरूपिकम् ।। २२

पतद्वेतालसोल्लासमध्यस्थासृग्विरूपिकम् ।

पिशाचाकर्णिताभ्यर्णयोगिनीगणनायकम् ।। २३

प्रसृतान्त्रमहातन्त्रीप्रायसंपन्नवादनम् ।

पिशाचवासनोत्क्रान्तपिशाचीभूतमानवम् ।। २४

रूपिकालोकनापूर्वत्रासार्धमृतसद्भटम् ।

क्वचिद्वेतालरक्षोभिरपरीपूर्णमद्रकम् ।। २५

स्वरूपिकास्कन्धपतच्छवत्रस्तनिशाचरम् ।

नभःसंघट्टितापूर्वभूतपेटकसंकटम् ।। २६

अतिप्रयत्नापहृतम्रियमाणनरामिषम् ।

स्वभक्ष्यापेक्षपक्षेषु विक्षिप्तशवराशिवत् ।। २७

शिवामुखानलशिखाखण्डोत्थमितिरक्तगैः ।

समुड्डीननवाशोकपुष्पगुच्छमिवाभितः ।। २८

कबन्धकन्धराबन्धव्यग्रवेतालबालकम् ।

यक्षरक्षःपिशाचादिकचदाकाशगोल्मुकम् ।। २९

आकाशभूधरनिकुञ्जगुहान्तराल-

पिण्डोपमण्डिततमोम्बुदपीठपूरम् ।

व्यालोलभूतरभसाकुलकल्पवात-

व्याधूतलोककरकाण्डकपेटकल्पम् ।। ३०

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये उत्पत्तिप्रकरणे ली० निशाचराकुलरात्रिरणाङ्गणवर्णनं

नामैकोनचत्वारिंशः सर्गः ।।३९।।